Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

નમો નાણસ્સ

# હિમગીરી જૈન ટ્રસ્ટ સંચાલિત તપોવન સંસ્કારપીઠ

# જ્ઞાનકોષ

ઝેરોક્સ પ્રતો

યોજના સ્થળ

## તપોવન સંસ્કારપીઠ

મુ. અમીયાપુર - પો. સુઘડ - જિ. ગાંધીનગર. પીન : ૩૮૨૪૨૪
ફોન નં. :- (૦૨૭૧૨) ૭૬૨૭૩, ૭૬૩૪૧

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीआर्द्रकुमारचरित्रं ॥

( कर्त्ता–श्रीशुभशीलगणी ) गद्यबद्ध )

छपावी प्रसिद्ध कर्त्ता–पण्डित श्रावक हीरालाल हंसराज. (जामनगरवाला)

सने १९२९. मूल्य रु. १—०—०

Printed at Jain Bhaskaroday Printing Press, JAMNAGAR.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्री जिनाय नमः ॥
॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीआर्द्रकुमारचरित्रं प्रारभ्यते ॥

( कर्ता—श्री शुभशीलगणी )

(छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज जामनगरवाळा)

श्रीवीतरागबिंबस्य । वीक्षणाद्देहिनामिह ॥ बोधिलाभो भवेदार्द्र—कुमारस्येव तत्क्षणात् ॥१॥ तथाहि—अस्मिन्नेव पयोधिमध्ये आर्द्रकनामाऽनार्यदेशोऽस्ति, स च देशो बहुधनधान्यप्रभृतिवर्यवस्तुभरालंकृतोऽस्ति. तत्रार्द्रकनामा नृपो न्यायाध्वना पृथ्वीं शशास. तस्यार्द्रकाभिधाना शीलादिबहुगुणगणविभूषिता राज्ञी बभूव. तयोर्दंपत्योः परस्परं हार्दिकी भूरिप्रीतिर्बभूव. यतः—प्रीतिर्जन्मनिवासतो १ ऽप्युपकृतेः २ संबंधतो ३ लिप्सया ४ । विंध्ये हस्तिव १ दंबुजे मधुपवत् २ चंद्रे पयोराशिवत् ३ ॥ अब्दे चातकवद्भवेदसुमतां सर्वत्र नैमित्तिकी । या निःकारणबंधुरा शिखिवदंभोदे क्वचित् सा पुनः ॥ १ ॥ अथान्यदा मग-



For Private and Personal Use Only

धविषयाधिपः श्रेणिको भूपतिर्निजमंत्रिण आर्द्रकद्वीपे आर्द्रकभूपप्रीतिसंपादनार्थं भूरिवर्यप्राभृतसहित प्रीतिलेखयुतान् प्रेषयामास. एवं सप्रीतिलेखं भूरिवर्यप्राभृतं स्वीकृत्यार्द्रकराजापि परमं संतोषं प्राप्य तान् मंत्रिणः पप्रच्छ. भो मंत्रिणः! तस्य मद्बन्धोर्मगधेशितुः किं कुशलमस्ति? ततस्तैर्मंत्रिभिरपि श्रेणिकभूपकुशलतोदंते निवेदिते नृपपार्श्वे स्थितस्तत्पुत्र आर्द्रकुमारः कृतांजलिर्निजजनकमपृच्छत्, भो तात! कोऽयं मगधाधिपस्ते सुहृत् विद्यते? तदा राजावदत्, वत्स! स श्रेणिकाभिधो मगधदेश-भूपतिरस्ति, तेन समं ममातीव प्रीतिर्विर्वर्तते. पुराप्यात्मीयकुलभूपतिभिः समं तत्रत्यभूपानां प्रीतिरासीत्, एवं कुलक्रमागताद्यापि सा प्रीतिरविच्छिन्नैव वरिवर्तते. एवं निजजनकवचांसि श्रुत्वाऽतीव-हृष्टः स आर्द्रकुमारस्तान् श्रेणिकनृपमंत्रिणो निजावासे समाकार्य रहोवृत्त्या पप्रच्छ, भो मंत्रिणः! युष्माकं तस्य श्रेणिकस्य राज्ञः किं कोऽपि सुतोऽस्ति? तदा मुख्यमंत्रिणा प्रोक्तं, भो कुमारेंद्र! तस्य श्रेणिकभूपस्य धियां पात्रं, पंचशतामात्याधिपतिरभयकुमाराभिधस्तनयोऽस्ति. तत् श्रुत्वा दाक्ष्यदाक्षिण्यनैपुण्यकला-कुशलः स आर्द्रकुमारोऽवदत्, तेनाभयकुमारेण सहाहमपि मैत्रीं कर्तुमिच्छामि. अतो यदा यूयं पश्चाद्

गच्छथ तदा मामाऽपृच्छयैव व्रजथ, यदहमपि तस्मै राजकुमाराय किमपि प्राभृतं प्रेषयितुमुत्सुकोऽस्मि. ओमित्युक्त्वा ते मंत्रिणोऽपि निजस्थानं ययुः. अथ स आर्द्रकराजा मनोहरभाजनपानादिभिस्तेषां श्रेणिकमंत्रिणां सर्वदा भूरिसत्कारं करोतिस्म. अथान्यदा स आर्द्रकराजा श्रेणिकभूपप्रेषणयोग्यमणिमुक्ताफलादिवर्यवस्तूनि स्वमंत्रिणे समर्प्य कथयामास, भो मंत्रिन्! त्वं मगधदेशे राजगृहे नगरे मदीयपरममित्र श्रेणिकनृपपार्श्वे गच्छ? तस्यैतानि वस्तूनि च मदीयप्रणामपूर्वकं त्वया प्राभृतीकरणीयानि. अथैवं नृपादिष्टः स मंत्री यदा राजगृहंप्रति गंतुं प्रयाणमकरोत्, तदा ते श्रेणिकमंत्रिणोऽपि तेनार्द्रकनृपेण सन्मानपुरस्सरं विसृष्टाः संत आर्द्रकुमारपार्श्वे गत्वा निजप्रयाणस्वरूपं निवेदयामासुः. तदा प्रमुदितः स आर्द्रकुमारोऽपि कोटिमूल्यमणिमाणिक्यमुक्ताफलपट्टकुलादिवर्यवस्तूनि तेभ्यः समर्प्य प्राह, भो मंत्रिणः! एतानि सर्ववस्तूनि युष्माभिर्मदीयाभिधानपूर्वकं तस्मै अभयकुमाराय समर्पणीयानि, मत्प्रणामपूर्वकं च तस्मै वाच्यं, यदार्द्रकुमारो भवद्भिः सह मैत्रीं कर्तुं वांछति. अथ तत्सर्वं प्रतिपद्य ते मंत्रिण आर्द्रभूपमंत्रियुताः शुभे मुहूर्ते राजगृहंप्रति यानारूढाः प्रयाणमकुर्वन्. प्रयाणं कुर्वंतस्ते सर्वेऽपि क्रमेण राजगृहं प्रापुः. तत्र

स आर्द्रभूपमंत्री सर्वाण्यार्द्रभूपदत्तानि वस्तूनि लेखयुतानि श्रेणिकनृपाय समर्पयामास. तानि वस्तूनि दृष्ट्वा श्रेणिकभूपोऽत्यंतं हृष्टस्तं मंत्रिणमधिकतरं सन्मानयामास. अथ ते श्रेणिकमंत्रिणोऽप्यार्द्रकुमारप्रेषितवस्तून्यभयकुमाराय लेखयुतानि समर्प्य तन्मैत्रीकरणार्थं तस्य संदेशं निवेदयामासुः. तत्सर्वं गृहीत्वा हृष्टोऽभयकुमारो दध्यौ, नूनं पूर्वभवे किंचिद्व्रत विराधनयायमार्द्रकुमारोऽनार्यदेशे समुत्पन्नः संभाव्यते, परं मन्मैत्रीमिच्छन् ध्रुवं स आसन्नभव्यो मुक्तिगाम्यस्ति. ततः केनापि प्रपंचरचनादिना तथा करोमि, यथायं परमर्हतो भवेत्. नूनं तस्यार्द्रकुमारस्य तीर्थंकरप्रतिमादर्शनतो जातिस्मरणज्ञानं समुत्पस्यते. अतोऽहं तत्र तस्य प्राभृतमिषेणार्हत्प्रतिमां प्रेषयामि. इति ध्यात्वा सोऽभयकुमारः श्रीऋषभदेवप्रतिमां पेटामध्यस्थां विधाय, तन्मध्ये च कुंकुमधूपचंदनादिपूजायोग्यवस्तूनि मुक्त्वा तां तालकेन मुद्रयामास. अथ श्रेणिकार्पितप्राभृत युत आर्द्रभूपमंत्री यदा प्रयाणार्थं प्रगुणो बभूव, तदा अभयकुमारस्तं समाहूय तीर्थंकरप्रतिमायुतां तां पेटां तस्मै समर्प्योवाच, भो मंत्रिन्! त्वयैषा पेटा तस्मै आर्द्रकुमाराय मदीयाभिधानकथनपूर्वकं समर्पणीया, कथनीयं चाभयकुमारस्त्वां परमसौहार्देन समभिलषति, पेटा चेयं त्वयैवैकांते समुद्घाट्य तन्स-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्यस्थवस्तु विलोकनीयं. इत्युक्त्वा तां पेटां तस्मै समर्प्यैको लेखोऽपि तेन तस्यार्द्रकुमारस्यार्पयितुं दत्तः, तल्लेखमध्ये चेयं गाथा लिखितासीत्–चित्तं तुम्ह विलग्गं। तुह गुणसवणेण सवणपरितोसो ॥ नयणे मे खु घवलं। तुह दंसणमहिलसइ ॥ १ ॥ अथ सोऽमात्योऽपि ततश्चलितः क्रमेण निजनगरे समायातः, श्रेणिकार्पितप्राभृतवस्तूनि च निजभूपाय समर्पयत्. तानि वस्तूनि विलोक्यार्द्रभूपालोऽप्यत्यंतं हृष्टः. ततः स मंत्री आर्द्रकुमारपार्श्वे गत्वाऽभयकुमारदत्तां पेटां लेखयुतां समर्प्योवाच, भो कुमारेंद्र! इयं पेटा त्वं यैवै-कांते समुद्घाटनीयेत्यभयकुमारेण भूरिस्नेहपूर्वकं कथितमस्ति. ततोऽसावार्द्रकुमारोऽपि रहसि स्वयमेव तां पेटां कुंचिकया समुद्घाट्य तन्मध्यस्थां रत्नाद्याभूषणैर्भूषितां पूजादिसामग्रीयुतां श्रीयुगादीशजिनप्रतिमां विलोकयामास. तां विलोक्य सोऽचिंतयत्, अहो! तेन मम परमसुहृदाभयकुमारेण किमिदमपूर्वं वस्तु प्रेषितमस्ति? अद्ययावन्मया कुत्राप्येवंविधं वस्तु न दृष्टं. किमिदं किंचिन्नवीनमाभूषणं विद्यते? एवं चिं-तयन्नसौ तां प्रतिमां निजकंठे, मूर्ध्नि, हृदये च स्थापयामास, परं तेन निजदेहस्य कापि शोभा न दृश्यते. ततोऽग्रे तत्सालंकारं श्रीयुगादीशबिंबं सिंहासनारूढं विधाय तत्सन्मुखं स्थित्वा स दध्यौ, किमीदृशं रूपं पूर्वं

मया क्वापि दृष्टं? इत्यादि भूयो भूयो भावयन् स आर्द्रकुमारो मूर्छामवाप्य जातिस्मरणमाप्तवान्. एवं लब्धजातिस्मरणोऽसाविति निजपूर्वजन्मास्मरत्. इतो भवात्तृतीयभवेऽहं वसंतपुरे मगधदेशे सामकाख्यः कौटुंबिकोऽभवं. भार्या च मे बंधुमत्यभिधा बभूव. अन्यदाहं तया मम भार्यया युक्तः श्रीसुस्थिताचार्यपार्श्वे धर्मं श्रोतुमगच्छं, गुरुभिश्चेत्थं धर्मोपदेशो दत्तः, यथा—त्रैकाल्यं जिनपूजनं प्रतिदिनं संघस्य सन्माननं। स्वाध्यायो गुरुसेवनं च विधिना दानं तथावश्यकं ॥ शक्त्या च व्रतपालनं वरतपो ज्ञानस्य पाठस्तथा। सैष श्रावकपुंगवस्य कथितो धर्मो जिनेंद्रागमे ॥ १ ॥ इत्यादिधर्मोपदेशेन प्रतिबुद्धेन मया भार्यायुतेन श्राद्धद्वादशव्रतानि स्वीकृतानि, कियत्कालं च तानि सर्वाण्यपि व्रतानि मया शुद्धभावेनाखंडं पालितानि. तत एकदा मूढभावेन प्रमादतस्तानि मया खंडितानि. अथ कियता कालेनांगीकृतानशना सा मम भार्या बंधुमती पंचत्वं प्राप्ता. तदा तदीयमोहमुग्धेन मया ध्यातमरेरे! तया मे प्राणप्रियया विनाथ जीवितेन किं? इति शोकपरः कृतानशनो मृत्वाहं दिवि देवोऽभवं. ततश्च्युत्वाहं धर्मवर्जितेऽनार्यदेशे व्रतखंडनप्रभावतोऽधुना जातोऽस्मि. अथ योऽयमभयकुमारो जिनबिंबप्रेषणेन मां प्रतिबोधयति, स नूनं ममोपकारी



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परमबांधवो गुरुश्चास्ति. अथाहं पितरमनुज्ञाप्य तत्रार्यदेशे गत्वा तस्याभयकुमारस्य मिलिष्यामि, जिनधर्माराधनतश्चेदं जन्म सफलं विधास्ये, एवं मनोरथान् कुर्वन् स तां श्रीयुगादिजिनप्रतिमां विधिना पूजयित्वाऽभयकुमारपार्श्वे गंतुकामो निजजनकसंनिधौ गत्वा जगाद, भो तात! अहं भवदीयपरममित्रश्रेणिकनृपतनयाभयकुमारस्य मिलनार्थं तत्र राजगृहनगरे गंतुमिच्छामि. तदा स आर्द्रकनृपोऽवदत्, भो वत्स! त्वया तत्र गमनेच्छा न कर्तव्या, यतो विदेशगमनं नूनं विषमं विद्यते. स्वस्थानस्थितस्यैव पुंसः शोभा भवति. किं चास्माकमपि तेन श्रेणिकनृपेणसह दूरस्थितानामेव मैत्री वर्तते, न च वयं कदापि तत्र यामः, न च सोऽप्यत्रायाति. एवं पित्रा निषिद्धः स आर्द्रकुमारस्तत्र गंतुमुत्सुकोऽपि वारिबद्धो द्विप इव स्थितः, उक्तं च—

आसने शयने याने । भोजने च क्रीयासु च ॥ अभयालंकृतामाशां—प्रति दत्तमना अभूत्. ॥ १ ॥

ततः स तत्रागतपथिकान् सर्वदा पृच्छति, स मगधदेशः कीदृशोऽस्ति? कीदृक् च सोऽभयकुमारोऽस्ति? एवं निजतनयमार्द्रकुमारं चलचित्तं विज्ञाय तद्गमनशंकया राजा गुप्तं पंचशतसुभटानादिश्येत्यादिशत्,



For Private and Personal Use Only

भो सुभटाः! अयमार्द्रकुमारो राजगृहे पुरेऽभयकुमारांतिके यियासुरस्ति, ततः स यथा तत्र गंतुं न शक्नोति तथा युष्माभिरेतस्य दूरस्थितैरेव रक्षणं कार्यं, परमयं संकेतो भवद्भिस्तस्य कदापि नैव वाच्यः. ओमित्युक्त्वा ते सेवार्थं समागत्य कुमाराय जगुः, भो कुमारेंद्र! राज्ञा वयं तव सेवार्थं नियुक्ताः स्मः, आदिष्टमस्ति च, यत्किंचिदपि तव सेवार्थं विलोक्यते, तत्सर्वं वस्तु कोशाद् ग्रहीतव्यमिति. ततो जनकप्रदत्तैस्तैः सेवकैः परिवृतः स कुमारो निजस्थानके समायातः, अथ यदा यदा स क्रीडार्थं वहिर्गच्छति, तदा तदा ते सर्वेऽपि सेवकास्तदीयदेहच्छायेव तं कदापि न मुंचंति. तदा स आर्द्रकुमारो बंदिनमिव धृतं स्वं मन्यमानो दध्यौ, अथ किं क्रियते? स्वर्णनिगडानीवैते सेवका मम पदबंधनकारिणो जाताः! कथं च ममाभयकुमारमिलनं भविष्यति? एवं चिंतापरोऽसौ तेषां विश्वासोत्पादनार्थमेवमुपायमकरोत्. प्रत्यहं स तैः सह जात्यतुरगमारूढः पुराद् वहिरुद्याने गच्छति, क्रमात् दूरं दूरतरं दूरतमं च गत्वा स पश्चाद् व्याघुट्य सदैवं पुनः समायाति. तदा ते सर्वेऽपि सेवकाश्चिंतयितुं लग्नाः, यदयं कुमारोऽधुना सर्वथाऽभयकुमारपार्श्वे विदेशं गंतुं नैवेच्छति. एवं जातविश्वासास्ते निजहृत्सु मनागपि तत्पलायनचिंतां न कुर्वंति. कुमारोऽपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वदा मनोज्ञाशनपानदानादिभिस्तेषां संतोषमुत्पादयतिस्म. अथ स आर्द्रकुमारः प्रच्छन्नं समुद्रतीरे निजविश्वस्तपुरुषैरेकं यानपात्रं सज्जयामास. अन्यदासौ जात्याश्वरत्नमारुह्य वेगेन तान् सर्वानपि सेवकान् पश्चाद्विमुच्य तया श्रीयुगादिजिनप्रतिमयायुतो महामूल्यरत्नभृतपेटासहितः समुद्रतीरे समागत्य पूर्वं प्रगुणीकृते तस्मिन् प्रवहणे समारुह्य समुद्रमार्गे चचाल.

एवं यानपात्रेण प्रयाणं कुर्वन् स कियद्दिनैः समुद्रापरतीरस्थे लक्ष्मीपुरनगरे समुत्तीर्णः. इतस्तत्रैव श्रीपुण्यनंदनाभिधा जैनाचार्याः समाययुः. आर्द्रकुमारोऽपि स्वं धन्यं मन्यमानो धर्मश्रवणार्थं तेषां समीपे समागात्. गुरुभिरपि तं योग्यं विज्ञायेति तस्य धर्मोपदेशो दत्तः, यथा—नृपत्वचक्रित्वहरित्ववैभवं । धर्मः प्रदत्तेऽनुभवं नवं नवं ॥ विशेषेहि तद्धर्मविधानधन्यतां । विभेहि नित्यं विषयानुषंगितां ॥१॥ लज्जातो भयतो वितर्कविधितो मात्सर्यतः स्नेहतो । लोभाच्चैव हठाभिमानविनयशृंगारकीर्त्यादितः ॥ दुःखात् कौतुकविस्मयव्यवहृतेर्भावात्कुलाचारतो । वैराग्याच्च भजंति धर्ममनलं तेषाममेयं फलं ॥ २ ॥ इयं मायारात्रिर्बहलतिमिरा मोहललितैः । कृतज्ञानालोकास्तदिह निपुणं जाग्रत जनाः ॥ अलक्ष्यः संहर्तुं ननु तनुभृतां



For Private and Personal Use Only

जीवितधना—न्ययं कालश्चौरो भ्रमति भुवनांतः प्रतिगृहं ॥३॥ इत्यादि धर्मोपदेशमाकर्ण्य स आर्द्रकुमारो वैराग्यवासितहृदयो बभूव. ततोऽसो सहानीतं सर्वमपि द्रव्यं सप्तक्षेत्र्यामुप्त्वा यतिलिंगमुपादातुं सर्वविरत्यर्थं यावत्स मायिकमुच्चतुमुत्सुकोऽभूत्. तावदाकाशस्थितया शासनदेवतया प्रोक्तं, भो महाभाग! यद्यपि त्वं महासत्त्वशाल्यसि, तथाहि सांप्रतं तव दीक्षाग्रहणं न युक्तं. यदद्यापि ते बहुलं भोगकर्मफलं विद्यते, तद्भोगकर्मफलं भुक्त्वा कियत्कालानंतरं त्वं चारित्रमाददीथाः, यतः कृतं कर्म भोगफलंविना न त्रुटति, यतः—कत्थइ जीवो बलीओ। कत्थइ कम्माइं हुंति बलिआइं ॥ जीवस्स य कम्मस्स य। पुव्वनिबद्धाइं वइराइं ॥ १ ॥ कृतकर्मक्षयो नास्ति। कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं। कृतं कर्म शुभाशुभं ॥ २ ॥ एवं शासनदेवतया निवारितोऽपि स आर्द्रकुमारः सत्त्वतः प्रबलीभूय प्रत्येकबुद्धो यतिरभूत्. एवं स निरतिचारं चारित्रं पालयन्नेकदा विहरन् वसंतपुरे समायातः, तत्र च बाह्यदेवकुले कायोत्सर्गेण तस्थौ. अथ तत्र वसंतपुरे नगरे धनदत्ताख्य एकः श्रेष्ठी वसति, तस्य च श्रीमतीनाम्नी पुत्री बभूव. क्रमाद्वर्धमाना सा बाल्यावस्थामुल्लंघ्य धर्मकर्मसर्वकलाकुशला जनि. अन्यदा समानवयस्काभिर्भूरिभिरिभ्य-



For Private and Personal Use Only

पुत्रीभिः परिवृता सा वरवरणक्रीडां कर्तुं आर्द्रकुमारर्षिसमलंकृते तत्रैव देवकुले समायाता. तदा सर्वाः कन्या बालक्रीडया जगुः, एते सर्वे स्तंभा वरतुल्या वर्तंते, वयं सर्वा अपि कन्याः स्मः, यस्यै यस्यै यो यो वर एषु रोचते, स स तया तया स्वहस्तालिंगनेनांगीकर्तव्यः. ततस्ताः सर्वाः स्वं स्वमेकैकं स्तंभं निज-वरबुध्ध्यांगीचक्रुः. श्रीमती तु स्तंभमलभमाना तं कायोत्सर्गस्थमार्द्रकुमारमुनिमेवांगीकृत्येत्युवाच, मया त्वयं भट्टारक एव वृतः. तदाकस्मादाकाशे " साधु वृतं, साधु वृतं " इति जल्पंती शासनदेवता तत्र गर्जितादिपुरस्सरं रत्नवृष्टिं चकार. यतः–राज्यं सुसंपदो भोगाः । कुले जन्म सुरूपता ॥ पांडित्यमायु-रारोग्यं । धर्मस्यैतत्फलं विदुः ॥ १ ॥ ततस्तस्यार्द्रकुमारमुनेः पादयोर्लगित्वा सा श्रीमती प्राह, भो मुने! अस्मिन् भवे त्वमेव मम पतिरसि. अहो! अनुकूलमुपसर्गोऽयं जातः, मदीयव्रतभंगश्च भविष्यति, इति ध्यायन् सोऽनगारशिरोमणिस्ततोऽन्यत्र विजहार. अथ तां देवताकृतरत्नवृष्टिमादित्सू राजा तयैव शासन-देव्या निषिद्धः. तत एतद्धनमस्यां कन्यायां परिणीतायां तस्या एव भविष्यतीति प्रोच्य राज्ञा तत्सर्वं श्रीमतीपितुरेव समर्पितं. ततो नृपादयः सर्वेऽपि जना निजं निजं स्थानं ययुः. अथ विवाहार्थं तां कन्यां

मार्गयितुं बहवो वराः समायांति, तदा श्रीमती जल्पतिस्म, यो मुनिर्मया पूर्वं वृतः, स एव मम स्वामी भवतु, अन्यथाग्निरेव मम शरणं भविष्यति, कुमारिका कन्या त्वेकवारमेव परिणयति, यतः—

सकृज्जल्पंति राजानः । सकृज्जल्पंति साधवः ॥ सकृत्कन्याः प्रदीयंते । त्रीण्येतानि सकृत् सकृत् ॥१

तदा श्रेष्ठी निजपुत्रीं प्राह, भो पुत्रि! परं स महर्षिः कथं प्राप्यः? यत एवंविधा महर्षयः क्षणमप्येकत्र नैव तिष्टंति, ते तु अलय इव स्थानात्स्थानं भ्रमंति, ततः सोऽत्र कथमायास्यति? आगतो वा कथमुपलक्षिष्यते? कथं च तस्य नाम ज्ञायते? किमन्यभिज्ञानं नास्ति, एवंविधा बहवो भिक्षवोऽत्रायांति यांति च, अतः स सम्यग् नैव ज्ञास्यते, तेन त्वं कदाग्रहं मा कुरु? यतः—वज्रलेपस्य मूर्खस्य । नारीणां मर्कटस्य च ॥ एकाग्रहस्तु मीनानां । नीलिमद्यपयोस्तथा ॥ १ ॥ तत् श्रुत्वा श्रीमती प्राह, भो पितः! यदाहं तस्य मुनेः पादयोर्लग्ना, तदा मया विद्युदुद्योतेन गजाकृतिरूर्ध्वरेखा तस्य पादे दृष्टास्ति, तादृक्चिह्नयुतं तं मुनिं नूनमहमुपायेन शोधयिष्यामि. तत् श्रुत्वा पित्रा प्रोक्तं, भो पुत्रि! यः कोऽप्युपायस्ते रोचते तं सुखेन कुरु? एवं जनकेन प्रोक्तया तया श्रीमत्येत्यभिग्रहः कृतः, यथा मया नित्यं चतुर्भ्यो दिग्भ्योऽत्र-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समागतानां मुनीनां शुद्धान्नपानादिभिः प्रतिलाभ्यैव तच्चरणवंदनपूर्वकं भोजनं कार्यं. इत्यभिग्रहपरैवा
नित्यं मुनिभ्यः शुद्धान्नपानादि दत्वा तेषां चरणवंदनं करोति. एवं कुर्वत्यास्तस्या द्वादश वत्सरा निर्गताः.
अथैकदा देवीविहितदिग्मोहः स एवार्द्रकुमारमुनिर्विहारं कुर्वंस्तत्रैव नगरे समायातः. तं मुनिं प्रतिलाभ-
यंती श्रीमती तत्पादयोर्वंदमाना सम्यगुपलक्ष्य जगौ, भो मुने! तदा देवकुले क्रीडंत्या मया त्वं वृतोऽसि,
अतस्त्वमेव मम वरोऽसि. तदा मां विप्रतार्य त्वं पलायितः, अधुना मदीयहस्तागतस्त्वं कथं यास्यसि?
अथ यदि त्वं मामवगणयिष्यसि, तदा तुभ्यमात्महत्यां दास्यामि. एवं स्त्रीहत्यापातकं च ते श्वभ्रप्रदं भ-
विष्यति, इत्युक्त्वा सा श्रीमती तस्य मुनेर्हस्तं निजहस्तेन दृढं गृहीत्वैवास्थात्. इतस्तमुदंतं विज्ञाय राजा-
दयो बहवो लोकास्तत्र मिलिताः. राजा तमार्द्रकुमारमुनिंप्रति जगौ, भो मुने! अथ यदि त्वमिमां कन्या-
मंगीकरिष्यसि, तदैव सा जीविष्यति, अन्यथेयं नूनं तवात्महत्यां दास्यति. तत् श्रुत्वा स आर्द्रकुमार-
मुनिरपि तां शासनदेवतावाणीं सस्मार, दध्यौ चाधुना समापतितं देवतोक्तं भोगकर्मफलमन्यथा कर्तुं
नैव शक्यते. दैवीवाचो नैवान्यथा भवंति. यतः–आरोहतु गिरिशिखरं । समुद्रमुल्लंघ्य यातु पातालं ॥



For Private and Personal Use Only

तत्रापि ध्रुवमन्वेति । कृतं शुभाशुभं कर्म ॥ १ ॥ इति विचार्य स आर्द्रकुमारमुनिर्नृपादीनामुपरोधेन तां कन्यां परिणीतवान्. ततस्तया सह भोगान् भुंजानस्य तस्यार्द्रकुमारस्य सुतः समुत्पन्नः. तस्य जन्मोत्सवोऽपि तेन विहितः. क्रमेण स सुतो वृद्धिं प्राप. तत एकदा पुनर्वैराग्यवासितहृदयः स आर्द्रकुमारो निजां पत्नीं प्राह. हे प्रिये! अथायं पुत्रस्ते सहायभूतो जातोऽस्ति. अहं चाथ पुनर्दीक्षां गृहीष्यामि. एवं विधं निजस्वामिवचनं श्रुत्वा विषण्णा सा श्रीमती पुत्रंप्रति तज्जनकाभिप्रायं ज्ञापयितुं तूलपूणिकां गृहीत्वा तर्कुणा कर्तयितुमुपविष्टा. इतो लेखशालातः समागतः स बालो मातरं कर्तयंतीं वीक्ष्य जगौ, भो मातः! किमिदमनीदृशं कर्मकरजनोचितं कर्म त्वयारब्धं? तत् श्रुत्वा श्रीमती जगौ, तव पिता दीक्षां गृह्णाति, ततस्तेन मुक्ताया ममाथाजीविकार्थं तर्कुरेवास्ति शरणं. बालेनोक्तं, मातस्त्वया दुःखं न कार्यं, अहं तथा करिष्ये, यथा मम पिता दीक्षार्थं गंतुमेवाशक्तो भविष्यति. इत्युक्त्वा तत्र सुप्तस्य निजजनकस्य पादौ तर्कुसूत्रेण वेष्टयित्वा स जगौ, भो जनक! ईदृशैः सूत्रतंतुभिर्बद्धस्त्वं दीक्षार्थमितः कथं गमिष्यसि? ततोऽसौ मातुः सन्मुखं विलोक्य जगौ, भो मातः! मया मे पिता तथा बद्धोऽस्ति, यथा स गंतुं न

शक्नोति. एवंविधं बालचेष्टितं विलोक्यार्द्रकुमारो दध्यौ, नूनं ममास्य पुत्रस्य मोहोऽद्यापि दीक्षार्थं निवारयति, यतो मयि दीक्षिते अस्य पुत्रस्य पत्न्याश्च का गतिर्भविष्यति? इति ध्यात्वा मोहाभिभूतेनार्द्रकुमारेणेति निजहृदये निश्चितं, अनेन बालेन यावंतस्तंतवो मदीयपादयोर्वेष्टिताः संति, तावंति वर्षाणि मया गृहवासे एव स्थेयं. ततः स आर्द्रकुमारस्तान् तंतून् गणयामास, सर्वे द्वादश तंतवो जाताः, ततस्तेन श्रीमतीं प्रियांप्रत्युक्तं, हे प्रिये! त्वं चिंतां मा कुरु? अद्याप्यहं द्वादश वत्सराणि गृहे एव स्थास्यामि, तदनंतरं नूनं दीक्षां लास्ये. एवं सुतप्रतिबंधेन स द्वादश वर्षाणि गृहे स्थित्वान्येद्युरिति दध्यौ—भवकूपाद्विनिर्गंतुं । व्रतमालंब्य रज्जुवत् ॥ मया प्राप्तं च मुक्तं च । मग्नस्तत्राप्यहं पुनः ॥ १ ॥ मनसैव व्रतं भग्नं । प्राग्जन्मनि ततोऽप्यहं ॥ अनार्यत्वं प्रपन्नोऽस्मि । का गतिः स्यादतः परं ॥ २ ॥ भवत्विदानीमप्यात्त–परिव्रज्यस्तपोऽग्निना ॥ साक्षात्प्रक्षालयिष्ये स्वं । मलिनीभूतहेमवत् ॥ १ ॥ इति ध्यात्वा स आर्द्रकुमारो निजां पत्नीं श्रीमतींप्रति प्राह, हे प्रिये! अथाहं दीक्षां लास्यामि, तदा श्रीमती जगौ, हे स्वामिन्! त्वां विनाहं कथं भविष्यामि? पुत्रस्यास्य च का गतिर्भविष्यति? तदार्द्रकुमारो जगौ हे प्रिये!

कथं त्वयैवमुच्यते? अस्मिन्नसारे संसारे कोऽपि कस्यापि नास्ति, निजनिजकर्मप्रेरिता जीवाः संयुज्यंते, वियुज्यंते च. यतः—जातश्चैको मृतश्चैक एको धर्मं करोति च ॥ पाप स्वर्गसुखे जीवः । श्वभ्रे गच्छति कः समं ॥ १ ॥ मूढाः कुर्वंति ये मे मे वपुःपुत्रगृहादिकं ॥ तेऽपि त्यक्त्वा च रोगार्त्ता । मज्जंति भवसागरे ॥ २ ॥ लाति पुनः पुनर्जीवो । नवं देहगृहादिकं ॥ कथं मे मे तनुर्गेहं । कलत्रं कुरुते जडः ॥३॥ कुटुंबं धनधान्यादि । सर्वमत्रापदां पदं ॥ देहं च मन्यते यः स्वं । कर्म बध्नाति सोऽल्पधीः ॥ ४ ॥ एको धर्ममुपार्जितं च विबुधः कृत्वा स्वयं गच्छति । स्वर्गं पापमुपार्ज्य घोरनरकं दुःखाकरं प्राणभृत् ॥ एको दुःखतति ह्यसारमपि भो धृत्वा च मुक्त्वा लयं । तस्मात्त्वं भज भावतो हि शरणं धर्मं त्यज स्वं गृहं ॥५॥ इत्यादिवचनैः पत्नीं पुत्रं च प्रतिबोध्य स्वयं पुनर्यतिलिंगमुपादाय निर्ममो निरहंकारः स निजगृहान्निर्गत्य वने गतः. एवं स आर्द्रकुमारमुनिरथ राजगृहंप्रति गच्छन् अंतराले चौर्यवृत्तितत्परं स्वं सामंतशतपंचकमुपलक्ष्य यावत्तत्र स्थितस्तावत् नूनमयमस्माकं स्वाम्येवेत्युपलक्ष्य तैर्भूयस्या भक्त्या वंदितः. ततः स आर्द्रकुमारमुनिस्तान् जगाद, भो सामंताः! युष्माभिः किमीदृशीयं पापकारिणो च दुर्गतिदायिनी वृत्तिः

समारब्धा? यतः—

चौर्यपापद्रुमस्येह । वधबंधादिकं फलं ॥ जायते परलोके तु । फलं नरकवेदना ॥ १ ॥ तदा ते सेवका जगुः, हे स्वामिन्! यदा त्वमस्मान् वंचयित्वा गतस्तदास्माभिः सर्वत्र विलोकितोऽपि न दृष्टः. तदास्माभिश्चिंतितमार्द्रकुमारस्तु गतः, अथ वयं भूपस्य कथं स्वमुखानि दर्शयामः? इति विचिंत्य वयं सर्वेऽपि यानारूढा अत्र समागताः. अत्रापि बहु विलोकमाना अपि वयं त्वामनुपलभ्य चौर्यवृत्तिमाचरामः. तदा मुनिराह, भो भद्राः! कष्टे समागतेऽपि सद्भिश्चौर्यवृत्तिर्नैव विधेया, इदं दुर्लभं मनुष्यजन्म प्राप्य सज्जनैस्तद्विधेयं, येनागामिनि जन्मनि शुभगतिर्भवेत्, यतः—जंतूनामवनं जिनेशमहनं भक्त्यागमाकर्णनं । साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननं ॥ मायाया हननं विशुद्धिकरणं लोभद्रुमोन्मूलनं । चेतःशोधनमिंद्रियाश्वदमनं यत्तच्छिवोपायनं ॥ १ ॥ केनापि पुण्ययोगेन । मानुष्यकमवाप्यते ॥ प्राप्य तद्दुर्लभं धर्मः । कार्यः स्वर्गापवर्गदः ॥ २ ॥ दया जीवेषु सत्योक्ति–रस्तेयं ब्रह्मचारिता ॥ आकिंचन्यं च धर्मोऽयं । जिनैरेव निवेदितः ॥ ३ ॥ ततो भो सामंताः! यदि भवंतो मयि भक्तिमंतस्तदा मदीयमार्गमाश्रयध्वं?



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो युष्माकमत्यंतं सुखं भविष्यति. तत् श्रुत्वा ते प्रोचुः, त्वमेवास्मत्स्वामी वर्तसे, तद्भवद्भिर्यत्किंचिदादिश्यते, तदेव वयं करिष्यामः. इत्युक्त्वा तैः सर्वैरपि दीक्षा गृहीता. ततस्तैः समं स आर्द्रकुमारर्षिः श्रीमहावीरं वंदितुं विहारं कुर्वन् राजगृहोपांतस्थोद्याने ययौ. तत्र केचित्तापसा एकं महांतं हस्तिनं हत्वा तन्मांसं भक्षयंतस्तिष्ठंतिस्म. तादृक्कर्म कुर्वतस्तान् वीक्ष्य स आर्द्रकुमारर्षिः प्राह, भो महानुभावाः! जीवहिंसा कर्तुं न युज्यते, जीवहिंसया हि प्राणिनामधमा गतिर्भवति, यतः—अस्थिन वसति रुद्रश्च । मांसे वसे जनार्दनः ॥ शुक्रे वसति ब्रह्मा च । तस्मान्मांसं न भक्षयेत् ॥ १ ॥ तिलसर्षपमात्रं च । मांसं यो भक्षयेन्नरः । तस्य स्यान्नरके वासो—ऽनंतदुःखप्रदोंगिनः ॥ २ ॥ तत् श्रुत्वा ते तापसाः प्रोचुः, वयमेकमेव महांतं जीवं हत्वा तन्मांसभक्षणपरा जीवामः, यूयं तु बहूनां धान्यजीवानां हिंसां कृत्वा निजाजीविकां विदधास्यथ. इत्युक्त्वा ते दयाभासवंतस्तापसा एकं महांतं हस्तिनं तरुणा सह बबंधुः. बहुभारलोहशृंखलाबद्धोऽसौ हस्ती तमार्द्रकुमारमुनिमालोक्य जीर्णरज्जुमिव तां शृंखलां त्रोटयित्वा वेगेन वंदितुं चलितः. एवं वेगेन धावंतं तं गजेंद्रं दृष्ट्वा ते सर्वेऽपि तापसाः हा! हा! अयं यतिर्हतो हत इति पुत्कुर्वंतस्तत्प- ॥ १८ ॥

श्चाद् धाविताः, परं स हस्ती तु तत्र गत्वा तमार्द्रकुमारमुनिं ननाम-तदा आर्द्रकुमारमुनिस्तं हस्तिनं जगौ, भो गजेंद्र! तव यदि धर्मे रुचिर्भवेत्तदा जैनधर्ममंगीकुरु? एवं मुनिनोक्तोऽसौ पुनस्तं मुनिं प्रणनाम. मुनिनापि पुनरुक्तं भो गजेंद्र! यदि तवानशनग्रहणेच्छा, तदानशनं गृहाण? ततस्तेन हस्तिनाऽनशनं गृहीतं. एवं हस्तिचेष्टितं दृष्ट्वा प्रबुद्धास्ते तापसा अपि जीवदयामूलं धर्ममंगीचक्रुः. अथ श्रेणिकनृपोऽपि गजशृंखलात्रोटनानशनग्रहणतापसप्रतिबोधादि श्रुत्वा अभयकुमारसहितस्तत्रागतः, भक्त्या च तमार्द्रकुमारमुनिं सपरिवारं पुत्रपौत्रादियुतोऽसौ ननाम. ऋषिणापि कल्याणकारिधर्माशिषा स प्रीणितः. ततो मुनिनोपदिष्टं धर्मोपदेशं श्रुत्वा राजा जगाद, भो महर्षे! भवद्दर्शनादनेन हस्तिना बहु भारप्रमाणा लोहशृंखला यत् त्रोटिता, तद्विषये मे मनसि महदाश्चर्यं जातमस्ति. मुनिरूचे भो नरेंद्र! एवंविधलोहशृंखलात्रोटनं तु सुकरं, परं यदामतंतुपाशत्रोटनं मया कृतं, तदेव सर्वसंसारिजीवानां दुष्करं. तत् श्रुत्वातीवविस्मितेन राज्ञा पृष्टं, भो मुनींद्र! तमतीवाश्चर्यकरं भवदीयामतंतुत्रोटनसंबंधं मे श्रावय? इति नृपप्रार्थितेन तेन मुनिना स्वकीयः सकलोऽपि संबंधः सर्वसमक्षं प्रकटीकृत्य कथितः. तत् श्रुत्वा नृपादयः ॥ १९ ॥

सर्वेऽपि लोकाश्चमत्कृताः. ततः स आर्द्रकुमारमुनिराह, हे राजन्! अयमभयकुमारो मे परमो बांधवोऽस्ति, येनाहं तत्रानार्यदेशेऽपि श्रीयुगादिजिनप्रतिमाप्रेषणेन प्रतिबोधितः, संसारकर्दमे च पतितोऽहंते न समुद्धृतः. एतदाकर्ण्य सोऽभयकुमारोऽपि वैराग्यवासितहृदयः श्रेणिकंप्रति प्राह, भो तात! अधुनाहमपि दीक्षां ग्रहीतुमिच्छामि, अतो ममादेशं देहि? यतो मदीयमित्रेणानेनार्द्रकुमारेण यत्कृतं, तत्कार्यं ममापि कर्तुं युक्तं. तन्निशम्य श्रेणिकोऽवदत्, भो पुत्र! त्वयाधुना दीक्षाग्रहणविषये किमपि न वाच्यं, तथापि चेत्त्वं बलाद् दीक्षां ग्रहीष्यसि, तदा त्वन्मातुर्भद्राया मम च हृदयस्फोटो भविष्यति, तव च मातापित्रोर्हत्यापापं लगिष्यति. ततः सोऽभयकुमारः पितृवचसा गृहवासस्थितोऽपि शुद्धं श्राद्धधर्मं पालयतिस्म. ततः स आर्द्रकुमारमुनिः श्रेणिकाभयकुमारयुतः समवसरणस्थं श्रीवीरजिनेंद्रं त्रिःप्रदक्षिणीकृत्य वंदतेस्म. वीरप्रभुणापि तस्मै धर्मोपदेशो दत्तः, यथा भो आर्द्रकुमारमुने! भवता शुद्धं चारित्रमाराधनीयं, यतः शुद्धचारित्राराधनं विना जीवस्य संसारान्मुक्तिर्न भविष्यति, यतो भूरिमनुष्या दीक्षां गृह्णांति, परं शुद्धमनसा स्तोका एव पालयंति. धर्म एव च परमबांधवः, धर्मादेव च स्वर्गापवर्गादि भवति. ततस्ते श्रेणि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीआर्द्रकुमारचरित्रं समाप्तम् ॥

For Private and Personal Use Only

कादयः सर्वेऽपि श्रीवीरं प्रणम्य यथास्थानं गताः. ततः स आर्द्रकुमारमुनिस्तीव्रतपोऽग्निना सर्वकर्मेंधनानि दग्ध्वा केवलज्ञानमवाप्यायुःक्षयेण मुक्तिपुरीं जगाम.

इति श्रीजिनप्रतिमादर्शनफलमाहात्म्योपदर्शने श्रीआर्द्रकुमारमुनिचरित्रं समाप्तं ॥ श्रीरस्तु ॥

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे श्री शुभशील-गणीजीए रचेला कथाकोषमांथी उद्धरीने तेनां मूलभाषामां बनता प्रयासे सुधारो वधारो करीने पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥ श्रीरस्तु ॥

आ ग्रंथना प्रसिद्ध करनारे आ ग्रंथ प्रसिद्ध करवाना तथा छापवाना दरेक हक पोताना स्वाधीनमां राख्या छे.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only